# ।। अथ श्रीसूक्तम् ।।



श्रीगणेशायनमः ॥ अथश्रीमहालक्ष्म्यैनमः ॥ हिरण्यवर्णामितिपंचदशर्चस्य सूक्तस्यआनंदकर्दमचिक्लीतेंदिरासुताऋषयः ॥ श्रीर्देवता ॥ आद्यास्तिस्रोऽनुष्टुभः॥ चतुर्थीबृहती ॥ पंचमीषष्ठ्यौत्रिष्टुभौ ॥ ततोऽष्टावनुष्टुभः ॥ अंत्याप्रस्तारपक्तिः ॥ जपेविनियोगः ॥

हरिःॐ ॥ हिरण्यवर्णांहरिणींसुवर्णरजतस्रजाम् । चन्द्रांहिरण्मयींलक्ष्मीं जातवेदोमआवह ।। १ ॥ तांमआवहजातवेदोलक्ष्मीमनपगामिनीम् । यस्यांहिरण्यंविन्देयंगामश्वंपुरुषानहम् ।। २ ॥ अश्वपूर्वांरथमध्यांहस्तिनाद प्रमोदिनीम् । श्रियंदेवीमुपह्वयेश्रीर्मादेवीजुषताम् ।। ३ ॥ कांसोस्मितां हिरण्यप्राकारामार्द्रांज्वलन्तींतृप्तांतर्पयन्तीम् । पद्मेस्थितांपद्मवर्णांतामि होपह्वयेश्रियम् ।। ४ ॥ चन्द्रांप्रभासांयशसाज्वलन्तींश्रियंलोकेदेवजुष्टामु दाराम् । तांपद्मिनीमींशरणमहंप्रपद्येऽलक्ष्मीर्मेनश्यतांत्वांवृणे ।। ५ ॥



Scanned with ACE Scanner

आदित्यवर्णेतपसोऽधिजातोवनस्पतिस्तववृक्षोऽथबिल्वः । तस्यफलानि
तपसानुदन्तुमायान्तरायाश्चबाह्याअलक्ष्मीः ।। ६ ।। उपैतुमांदेवसखःकीर्तिश्च
मणिनासह । प्रादुर्भूतोसुराष्ट्रेऽस्मिन्कीर्तिमृद्धिंददातुमे ।। ७ ।। क्षुत्पिपासा
मलांज्येष्ठामलक्ष्मींनाशयाम्यहम् । अभूतिमसमृद्धिंचसर्वांनिर्णुदमेगृहात् ।। ८ ।।
गन्धद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीम् । ईश्वरींसर्वभूतानांतामिहोपह्वये
श्रियम् ।। ९ ।। मनसःकाममाकूतिंवाचःसत्यमशीमहि । पशूनांरूपमन्न
स्यमयिश्रीःश्रयतांयशः ।। १० ।। कर्दमेनप्रजाभूतामयिसंभवकर्दम । श्रियंवा
सयमेकुलेमातरंपद्ममालिनीम् ।। ११ ।। आपःस्रजन्तुस्निग्धानिचिक्लीत
वसमेगृहे । निचदेवींमातरंश्रियंवासयमेकुले ।। १२ ।। आर्द्रांयःकरिणींयष्टिं
सुवर्णांहेममालिनीम् । सूर्यांहिरण्यमयींलक्ष्मींजातवेदोमआवह ।। १३ ।।
आर्द्रांपुष्करिणींपुष्टिंपिङ्गलांपद्ममालिनीम् । चन्द्रांहिरण्यमयींलक्ष्मींजात
वेदोमआवह ।। १४ ।। तांमआवहजातवेदोलक्ष्मीमनपगामिनीम् ।

यस्यांहिरंण्यंप्रभूतंगावोंदास्योऽश्वान्विन्देयंपुरुंषानहम् ।। १५ ।। यःशुचिः
प्रयंतोभूत्वाजुहुयांदाज्यमन्वंहम् । सूक्तंपञ्चदंशर्चंचश्रीकामंःसततंजंपेत्
।।१६।। पद्मानंनेपंद्मऊरुपद्माक्षिंपद्मसंभंवे । तन्मेंभजसिंपद्माक्षियेनसौख्यं
लभाम्यंहम् ।। १७ ।। अश्वदायैंगोदायैधनदांयैमहाधंने । धनंमेलभंतांदेवि
सर्वकांमांश्चदेहिंमे ।। १८ ।। पद्मांननेपंद्मविपंद्मपत्रेपद्मंप्रियेपद्मदलांयताक्षि ।
विश्वंप्रियेविश्वमनोंऽनुकूलेत्वत्पांदपद्मंमयिसंनिंधत्स्व।।१९।।पुत्रपौत्रधंनंधान्यं
हस्त्यश्वांदिगवेरंथम् । प्रजानांभंवसीमाताआयुष्मंन्तंकरोतुंमे ।। २० ।।
धनंमग्निर्धनंवायुर्धनंसूर्योंधनंवसुंः । धनमिन्द्रोबृहस्पतिर्वरुंणंधनमस्तुंमे
।।२१।। वैनंतेयसोमंपिबसोमंपिबतुवृत्रहा । सोमंधनंस्यसोमिनोमह्यंददांतु
सोमिनंः ।। २२ ।। नक्रोधोनचंमात्सर्यंनलोभोंनाशुभामंतिः । भवंन्तिकृतं
पुण्यानांभक्तानांश्रीसूंक्तंजंपेत्।।२३।।सरसिजनिलयेसरोंजहस्तेधवलतरां
शुकगंधमांल्यशोभे।भगवतिहरिवल्लभेंमनोज्ञेत्रिभुवनभूतिकरिप्रंसीदमह्यम्



Scanned with ACE Scanner

ऋ. नि. ।। २४ ॥ विष्णुपत्नींक्षमांदेवींमाधवींमाधवप्रियाम् । लक्ष्मींप्रियसखींदेवीं श्री-
(२०७) नमाम्यच्युतवल्लभाम् ।। २५ ॥ महालक्ष्मीचविद्महेविष्णुपत्नीचधीमहि । सूक्तम्
तन्नोलक्ष्मीःप्रचोदयात् ।। २६ ।। श्रीवर्चस्वमायुष्यमारोग्यमाविधाच्छो
भमानंमहीयते । धान्यंधनंपशुंबहुपुत्रलाभंशतसंवत्सरंदीर्घमायुः ।। २७॥

।। इति श्रीसूक्तम् ।।

Scanned with ACE Scanner